



अथश्रीमद्भागवतचूर्णिकातृतीयस्कंधःप्रारभ्यते.





श्रीगणेशायनमः श्रीशुकउवाच एवंपुराविदुरः मैत्रेयंप्रतिएतत्पृष्टवान् राजोवाच भगवतामैत्रेयेणसहक्ष
त्तुः संगमः संवादश्चकुत्रअभूत् हेप्रभोतत्नःवर्णय श्रीशुकउवाच यदाधृतराष्ट्रःअसाधून्सुतान्पुष्णान्पांडवान्
लाक्षाभवनेददाह यदारुषायाः द्रौपद्याः केशाभिमर्शनंनवारयामास द्यूतेजितस्यधर्मस्यसमयेभागंयाचतः सतःनअ-
दात् सामार्थेआगतस्यश्रीकृष्णास्यवचनानिसाधुनमेनेयदाधृतराष्ट्रेणपृष्टः विदुरः धर्मार्यदायंदेहीति अकथयत् किंच कुलकौ
शलायइमंदुष्टंपुत्रंत्यजइत्युक्तेसति कर्णदुःशासनशकुनिदुर्योधनादिभिः कोपात्क्षत्तातिरस्कृतः एनंदासीपुत्रंअत्रकःआजुहा-
व पुरात्आशुनिर्वास्यतांइतिदुर्वचः श्रुत्वाक्षत्तासभाद्वारिधनुर्निधायततोनिर्गत्यपुण्येच्छयातीर्थायतनानिभ्रमन् इत्थंगांपर्यटन्
अधःशयानःअवधूतवेषः हरितोषणव्रतानिचेरे एवंभारतमेववर्षंव्रजन्कालेनप्रभासंगतवान् तावद्धर्मःक्षितिंशशास तत्रसु
हृद्विनाशंश्रुत्वाशोचन्सरस्वतीमभिमुखंययौ ततःक्रमेणतीर्थानिभ्रमन्यमुनामेत्यउद्धवंदृष्ट्वास्वानांकुशलंअपृच्छत् हेउद्धव
रामकृष्णौकुशलौकिम् वसुदेवप्रद्युम्नोग्रसेनसांबसात्यक्यक्रूरदेवस्यनिरुद्धहृदीकाद्याः पृथासहिताः पांडवाश्चस्वस्तिकिं हेसौ
म्यतंधृतराष्ट्रमनुशोचेयः मृतायपांडवेदुद्रुहेयेनअहंपुर्याः निर्यापितः सोहंहरेःप्रसादात् तन्माहात्म्यंपश्यन्भूतलेगूढः सन्चरामि
नूनंमत्तराज्ञांवधायभूमेःभारहरणार्थंचकुरूणामपराधान्सेहेकिंच शरणागतदेवादीनांपृथिव्याश्चपालनायदुष्टनिग्रहार्थंयदु
षुजातस्यतीर्थकीर्तेः भगवतः अजस्यवार्ताहेउद्धवकीर्तय ४५ इतितृतीयेप्रथमः१ श्रीशुकउवाच इत्थंविदुरेणपृष्टःउद्धवःप्रि
याश्रयांवार्तांप्रतिवक्तुंनचोत्सेहेकुतः यःपंचहायनःमात्राप्रातःभोजनायआहूतःसन्बाललीलयातस्यसपर्यांरचयन्भोजनमपिनैच्छत् १
सःतस्यसेवयावृद्धःसन्प्रभोःपादौस्मरन्श्रीकृष्णवार्तांकथंब्रूयात्सःमुहूर्तंतूष्णींअभवत्तेनभक्तियोगेनपूर्णार्थः लक्षितः ततःशनैः

भगवल्लोकात् देहानुसंधानं आगतःसन् नेत्रे विमृज्य विदुरं आह उद्धव उवाच कृष्णद्युमणौ अस्तमिते सति कालमहासर्पेण गिलितेषु नः गृ
हेषु बंधूनां कुशलं किंनु ब्रूयां अयं लोकः दुर्भगः यादवास्तु नितरां दुर्भगाः येसंवसतः मीनाः उडुपमिव हरिं न विदुः इंगितज्ञा अपि यादवाः अस्मा
सु श्रेष्ठ इति अमन्यंत यः नृणां स्वबिंबं दर्शयित्वा अंतरधात् धर्मसूनोः राजसूये त्रिलोकः यं निरीक्ष्य विधातुः कौशलं इह कार्त्स्न्येन उपक्षीणं इ
ति अमन्यत यत् वसुदेवगेहे अजस्य जन्म अनंतवीर्योपि अरिभयात् अपलायत व्रजे वासं च कृतवान् एतत् मां खेदयति अमुष्य अंघ्रिस
रोजरेणुं विस्मर्तुं कः समर्थो भवेत् अहो इयं पूतना यं जिघांसया स्तनकालकूटं अपाययत् साधात्र्युचितां गतिं लेभे ततः कं वा दयालुं अन्यं श
रणं व्रजेम अहं असुरान् भागवतान् मन्ये ये युद्धे गरुडारूढं स्फनाभायुधं अवलोकयंतः देहं जहुः यः ब्रह्मणार्थितः सन् भूमेः भारहरणा
य वसुदेवस्य देवक्यां जातः ततः कंसात् बिभ्यता पित्रा नंदव्रजं नीतः तत्र सबलः एकादशसमाः अवसत् किंच कौमारीं चेष्टां दर्शयामास
गाः पालयामास किंच कंसेन प्रेषितान् दैत्यान् लीलया व्यनुदत् कालियं निगृह्य विषोदप्राशनेन मृतान् गोगोपान् जीवयामास गोवर्द्धनो
त्सवं कारयामास कोपात् इंद्रे वर्षति सति गोवर्द्धनोद्धरणं कृत्वा गोपादीन् संरक्षितवान् स्त्रीमंडलं रमयन् स्वयं गायन् रेमे ३४ इति-
तृतीये द्वितीयोध्यायः २ उद्धव उवाच ततः स्वपित्रोः शं चिकीर्षया बलदेवसंयुतः कंसं राजमंचात् निपात्य तं व्यकर्षत् सांदीपिना प्रो
क्तं ब्रह्म अधीत्य तस्मै मृतं पुत्रं प्रादात् गांधर्ववृत्त्या रुक्मिणीमुवाह सप्त वृषभान् दमित्वा नाग्नजितीमुवाह सत्यभामायाः प्रियार्थे इंद्रं
जित्वा पारिजातं आनयत् युद्धे भौमं हत्वा तत्पुत्रं राज्ये स्थापयित्वा तेन आहृताः नरदेवकन्याः हरिं वव्रुः हरिः एकस्मिन्मुहूर्ते आसां पा
णिं यथाविधि जगृहे एकैकस्यां दशदश पुत्रान् अजनयत् कालयवनमागधशाल्वशंबरद्विविदबाणमुरदंतवक्त्रादीन् घातितवान् कां
श्च अन्यैः अघातयत् अथ कुरुक्षेत्रे भग्नोरुं सुयोधनं उर्व्यां पतितं पश्यन्नपि न ननंद यतः भीष्मभीममूलैः क्षपितः भारः कियान् कुतः यदू

नांदुर्विषहंबलं आस्ते एषांवधोपायः अन्यतोन इतिचिंत्य युधिष्ठिरं राज्येस्थाप्य अश्वमेधत्रयेणयाजयित्वाभगवान् द्वारवत्यांआसक्तः
सन् कामान् सिषेवे किंच यदून् नितरांरमयन् स्वयंरेमे ततः भगवान् गृहेषु औदासिन्यंअकरोत् कदाचित् पुर्यांक्रीडद्भिः यदुकुमारकैःको
पिताः मुनयः भगवन्मतकोविदाः शापंददुः ततः कतिपयैः मासैः यदुभोजादयाःशापमुक्तये प्रभासंययुः तत्रस्नात्वादेवादीन् तर्पयित्वाब्रा
ह्मणेभ्यः गावः हिरण्यं रजतं शय्यांवासांसि अजिनकंबलान् अन्नादिंचदत्वामूर्द्धभिःप्रणेमुः २८ इतितृ॰तृतीयः ३ उद्धवउवाच अ
थभगवदनुज्ञातास्ते भुक्त्वामदिरांपीत्वातयाविभ्रंशितधियः अन्योन्यं मर्मदुरुक्तैः पस्पृशुः तेषांमदिरादोषेण रवौ अस्तंगतेसति वेणूनामि
वकदनंआसीत् भगवान् स्वमायागतिंवीक्ष्यसरस्वत्यां आचम्य अश्वत्थमूलेउपाविशत् अहंवदरींप्रयाहीति भगवताउक्तोपितत्पृष्ठतः
अन्वगमं तत्रएकंवामेऊरौ कृतदक्षिणांघ्रिसरोरुहं आसीनंकृष्णां अद्राक्षम् तदैवभगवान्मैत्रेयः यदृच्छयातत्रैव आगमत् मुकुंदःअनुर
क्तस्यतस्य शृण्वतःमांविश्रमयन् उवाच श्रीभगवानुवाच हेउद्धवतेमनसियत् ईप्सितंतत् अहंवेद्मियत् अन्यैःदुरवापंतत् ज्ञानं
तेददामि इत्यावेदितहार्दायमह्यंसभगवान् परंस्वात्मरहःप्रकाशंआत्मनः परमंस्थितिरूपं ज्ञानंप्रोवाच सोहंवदरींप्रयाहीत्याज्ञप्तः
सन् तत्पादौप्रणम्ययत्रनारायणोदेवः नरश्चदीर्घंतपः तेपाते तंबदरिकाश्रमंगमिष्ये श्रीशुकउ॰ उद्धवात् एवंसुहृदांवधंनिशम्यवि
दुरः उत्पतितंशोकंज्ञानेनशमयन् उवाच हेउद्धवयोगेश्वरः कृष्णःतुभ्यंयत् ज्ञानंआह तत् नः वक्तुंअर्हसि उद्धव॰ रेमर्त्यलोकंजिहासता
भगवताआदिष्टःमैत्रेयः तेज्ञानंवक्ष्यति श्रीशुकउ॰ इतिविदुरेणासह हरेर्गुणान् कथयन् यमुनायाःपुलिने एकांरात्रिंस्थित्वाउद्धवः
वनंअगात् परीक्षिदुवाच सर्वेयादवाःशापात् नष्टाः हरिरपिआकृतिंतत्यजे उद्धवस्तु कथमवशिष्टः - श्रीशुकउवा॰ ब्रह्मशापनिमि
त्तेनहरिः स्वकुलंसंहृत्यदेहंत्यजन् इदंअचिंतयत् मयिअस्मात् लोकात् उपरतेसति मदाश्रयंज्ञानंलोकानामुपदिशन् इहउद्धवःतिष्ठतु

इतित्रिलोकगुरुणाआज्ञप्तःउद्धवः किंचित्कालंअत्रस्थितः ततः बदर्याश्रमंआसाद्यसमाधिनाहरिं ईजे विदुरोपिउद्धवात् सर्ववृत्तंश्रुत्वा भगवताच आत्मस्मरणंकृतमिति श्रुत्वाकालिंद्याःसकाशात् कतिभिर्दिवसैः यत्रमैत्रेयस्तिष्ठति तत् गंगाद्वारंययौ ३६ इतितृतीयेचतुर्थः४ श्रीशुकउ० गंगाद्वारेआसीनंमैत्रेयंप्रतिविदुरः गत्वापप्रच्छ विदुरउवाच लोकःसुखाय कर्माणि करोति तैःसुखंदुःखो पशमंवानाप्नोति भूयःदुःखमेवविंदेत अतःएवंविधे संसारेनः यत् कर्तुं योग्यं तत् भगवान्नः वदेत् भवादृशाः इहजनानां अनुग्रहायचरंति हेसाधुवर्ययेन भगवान् भक्तिपूतेहृदिस्थितः सन् ज्ञानंयच्छति तत्वर्त्मनः आदिशहरिः इदंअग्रेयथाससर्ज अवतारान् गृहीत्वायत् यत् अकरोत् तत् वद मयाव्याससुखात् बहूनिव्रतानिश्रुतानि परंतुकृष्णकथाश्रवणेन तृप्यामि सःविश्वस्यजन्मस्थितिसंयमार्थे कृतावतारः सन् कर्माणि चकार तानि मह्यं कीर्तय मैत्रेय० हेसाधोत्वयासाधुपृष्टंभवान्यमः मांडव्यशापात् व्यासात् दास्यांजातोसि तवज्ञानोपदेशाय भगवान् मांआदिशत् अथते भगवल्लीलाः आनुपूर्व्येण वर्णयामि आदौसृष्टेः पूर्वआत्माएकएवआसीत् ततःसदसदात्मिकांमायांससर्ज तस्यांआत्मांशभूतेन पुरुषेणचिदंशंआधत्त ततः महत्तत्वंजातं ततः अहंकारः अभूत् सःत्रिविधः सत्वरजस्तमात्मकः सत्वात्मकात् मनः देवाश्च अभवन् राजसात् ज्ञानकर्मेंद्रियाणि तामसात् भूतसूक्ष्माणि तेषुकालमायांशयोगेन भगवतावीक्षितेषु आकाशआसीत् ततःवायुः ततोऽग्निः ततआपः ततःपृथ्वी एतेविष्ण्वंशादेवाः ब्रह्मांडरचनायां अशक्ताः संतः विभुंतुष्टुवुः हेदेवते पदारविंदंनमाम हेपितः त्वत्पादभजनंविनातापत्रयहताः जीवाः शर्मनलभंते किंच गृहासक्तानांत्वच्चरणारविंदं दुःप्रापं तत् वयंप्रपन्नाः अतोस्मान् पाहि इत्यादिस्तुत्वाप्रार्थयंते हेदेवयथास्माभिः ब्रह्मांडरचनास्यात् तथाअनुग्रहोविधीयतां ५० इतितृतीयेपंचमः५ मैत्रेयउवा० इतिस्वशक्तीनांतासांगतिं दृष्ट्वाकालसंज्ञांशक्तिंगृहीत्वाप्रकृत्यादित्रयोविंशतितत्वानांगणं भगवान्

युगपत् आविशत् तदासः गणः स्वांशैः विराड् देहं जनयामास सः विराड् अंतर्यामी आंडकोशे अप्सुबहुकालं वसन् आत्मानं एकधा हृदया
वच्छिन्नचैतन्येनत्रिधा अध्यात्मादिना दशधा प्राणरूपेण व्यभजत् अथतस्य आयतनानि निरभिद्यंत तानि शृणु आदौतस्य आस्यं निर्भि
न्नम् तत्र अग्निर्देवता वाक् इंद्रियम् वक्तव्यंविषयः ततः तालु अधिष्ठानम् वरुणः देवता जिह्वा इंद्रियम् रसोविषयः ततः नासिका अ॰ अ
श्विनौदेवते घ्राणंइं॰ गंधःविषयः अक्षिणी अ॰ सूर्यः दे॰ चक्षुः इं॰ रूपंवि॰ चर्म अ॰ अनिलः दे॰ त्वक् इं॰ स्पर्शोविषयः कर्णौ अ॰ दिशः दे॰ श्रो
त्रंइं॰ शब्दोवि॰ मेंढ्रं अ॰ प्रजापतिः दे॰ रेतः इं॰ सुखंवि॰ गुदं॰ अ॰ मित्रः दे॰ पायुः इं॰ विसर्गः वि॰ हस्तौ अ॰ इंद्रः दे॰ वार्ता इं॰ जीविकावि॰ पादौ
अ॰ विष्णुः दे॰ गतिः इं॰ प्राप्यंवि॰ हृदयं अ॰ चंद्रः दे॰ मनः इं॰ संकल्पादिविक्रियावि॰ त्वक् अधिष्ठानं ओषधयः दे॰ रोम इं॰ कंडूतिः वि॰ अहंका
रः अ॰ रुद्रः दे॰ अहंवृत्तिः इं॰ क्रियावि॰ बुद्धिः अ॰ ब्रह्मादे॰ चित्तंइं॰ विज्ञानंवि॰ अस्यविराड् रूपस्य शिरसः द्यौः उत्पन्ना पद्भ्यां धरा नाभेः खं
मुखतः ब्रह्मबाहुभ्यां क्षत्रियः ऊरुभ्यां वैश्यः पद्भ्यां शूद्रः हे क्षत्तः एतत् भगवतः विराड् रूपं साकल्येन कथयितुं कः समर्थः भवेत् अथापि
यथा गुरुमुखात् श्रुतं तथा हरेः कीर्तिं कथयामि अहो भागवती माया मायिनामपि मोहिनी यस्मात् हरिः स्वमायागतिं एतावत् इतिनवेद
अनंतत्वात् अपरे किमुत तस्मै भगवते नमः ३९ इतितृतीये षष्ठोऽध्यायः ६ श्रीशुक उवा॰ विदुरः मैत्रेयात् विराडुत्पत्तिं श्रुत्वा प्रत्य-
भाषत विदुर उवा॰ हे ब्रह्मन् निर्विकारस्य क्रियाः निर्गुणस्य गुणाः लीलयापि कथं युज्येरन् यः स्वमायया विश्वं असाक्षीत् यः देश
तः कालतः अवस्थातः स्वतः अन्यतः अविलुप्तात्मबोधः सः मायया कथं युज्येत एतत् वद मैत्रेय उवा॰ सेयं भगवतो माया तर्के
ण न ज्ञायते यथा स्वप्ने मम शिरः छिन्नं इति मृषासत् सत्यमेव प्रतीयते तद्वत् सा माया निवृत्तिधर्मेण वासुदेवकृपया भगवद्भक्तियोगे-
न च शनैः तिरोधत्ते तदा क्लेशाः विलीयंते विदुर उवा॰ हे मैत्रेय ईशस्य कर्तृत्वादि जीवस्य संसारः इदं कथम् एवं मे संशयः पूर्वमासी

त् सः ते सूक्तासिना छिन्नः परंतु अधुना ईशस्वातंत्र्ये जीवपारतंत्र्ये मे मनः धावति किंच एतत् दुर्भगत्वादि मायाश्रयं त्वया उक्तं तत्सा
धु किंच यः मूढः यश्च ईशं प्राप्तः तौ सुखं जीवेते अंतरितः क्लिश्यति अपिच अत्र भवे अर्थो नास्ति किंतु प्रतीतिर्वर्तते सापि भवच्चरण
सेवया गच्छेत् अपिच यः विराजं सृष्ट्वा तदनु तं प्राविशत् यं सहस्त्रांघ्र्यादि विशिष्टं आहुः यत्र इमे लोकाः सविकाशं तिष्ठंति तद्विभूतीः
वर्णय सः ब्रह्मा प्रजापतीन् सर्गान् अनुसर्गान् मनून् मन्वंतराधिपान् कान् अकल्पयत् तेषां वंशान् वंशानुचरितं च लोकत्रय प्रमाणं ति
र्यक् मनुष्य देव सरीसृप पतत्रिणां सर्गं चतुर्विध प्राणिनां उत्पत्तिं वद भगवद वतराणां विक्रमं वर्णाश्रम विभागान् ऋषीणां जन्म कर्म
वेदविभागान् यज्ञविस्तारान् योगज्ञान सांख्य मार्गान् पाखंड प्रवृत्तिं जीवस्य गतीः धर्मार्थ काम मोक्षोपायान् श्राद्धविधिं ग्रहादीनां-
स्थितिं दानस्य तपसः इष्टापूर्तयोः फलं प्रवासधर्मं तत्वानां प्रलयं पुरुष संस्थानम् जीवतत्वं औपनिषदं ज्ञानं एतान् प्रश्नान् हरेः कर्म
विवित्सया मया कृतान् त्वं ब्रूहि सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ जीवाभय प्रदानस्य न कुर्वीरन्कलामपि श्रीशुकउ०
इति विदुरेण पृष्टः सन् मैत्रेयः सर्वं अकथयत् ४२ इति तृतीये सप्तमः ७ मैत्रेय उवाच हे विदुर अहो अयं पुरुवंशः सद्भिः से
व्यः यत्र लोकपालः त्वं भूत्वा भगवत्कीर्तिं पदे पदे नूतनयसि अतः सोहं नृणां दुःखविरमाय महत्सुख प्राप्तये भागवतं पुराणं प्रवर्तये
यत् संकर्षणः भगवान् कुमारान् अकथयत् ते सांख्यायनाय सः अस्मद्गुरवे पराशराय बृहस्पतेश्च सः मह्यं अकथयत् अहं तत् भा
गवतं हे वत्स ते श्रद्धालवे कथयामि यदा विश्वं एकार्णवोदके निमग्नं आसीत् तदा शेषशय्यायां चतुः सहस्त्रयुगं स्वपन् स्वशक्तिभिः
आस्ते यदा च भगवतः लोकसिसृक्षा जाता तदा तन्नाभितः कमलं आसीत् स एव विष्णुः तस्मिन्कमले विधातृरूपः बभूव तस्य प्रति-
दिशं ईक्षणेन चत्वारि मुखानि बभूवुः स ब्रह्मा अहं कस्माज्जात इति चिंतयन् तत्कमल नाल नाडी द्वारा अंतर्गत्वा बहुकालं वर्षशतं विचि-

त्वन्स्वस्याधिष्ठानं नज्ञातवान् ततःनिहृत्स्यकमलेस्थित्वासमाधिस्थः अभवत् तदास्वहृदयेशेषपर्यंकेशयानंमरकतश्यामंपीतांब
रंविचित्रदिव्याभरणंकौस्तुभवनमालादियुतंहरिंददर्श भगवन्निवेशितचित्तःसन् विभुंअस्तौत् ३३ इतितृतीयेऽष्टमः ८
ब्रह्मोवाच हेभगवन् बहुकालोपासनेनमया अद्यत्वंज्ञातोसि इदंभुवनमंगलंरूपंउपासकानांमंगलाय ध्यानेदर्शितं तस्मैभ
गवतेनमः हेभगवन् त्वदतिरिक्तंसर्वंमायामयं तवएतत् रूपंतु प्रकृतेःपरम् अवतारशतैकबीजमिदंउपासनार्थमाविष्कृतम् य
न्नाभिपद्माद हंआविरासम् किंच तावत् द्रविणगेहसुहृन्निमित्तं भयंशोकःस्पृहापरिभवःलोभःममेत्यसद्ग्रहः आर्तिमू
लंच यावत् लोकः अभयंते अंघ्रिमूलंनप्रवृणीत यस्यतव अवतारगुणकर्मविडंबनानिनामानि प्राणप्रयाणेविवशाः संतः येगृ
णंति तेअनेकजन्मपातकंसहसैवहित्वाब्रह्म प्राप्नुवंति तंअजंशरणंप्रपद्ये तस्मैभुवनद्रुमाय अनिमिषाय यज्ञाधिष्ठात्रेपुरुषो
त्तमायनमः सःत्वंनः विषादंमाध्व्यागिराअपनयतात् मैत्रेयउवाच ब्रह्मा एवंस्तुत्वाविरराम तदाभगवान् उवाच हेवेदगर्भ
त्वं आलस्यंमाकुरु सर्गोद्यमंआवह त्वंयत् प्रार्थयसे तत् मयाअग्रेसंपादितं त्वंभूयःतपः मदाश्रयांविद्यांच आतिष्ठ ताभ्यांस्वहृ
दि अपावृतान् लोकान् पश्यसि ततः भक्तियुक्तःसन् आत्मनिलोकेचव्याप्तंमांद्रक्ष्यसि सृष्टौतवमोहः नभविष्यति अहंतेप्रीतोस्मि
यः पुमान् त्वत्कृतस्तोत्रेण स्तुत्वामांभजेत् तस्यआशु अहंप्रसन्नःस्याम् हेब्रह्मन् याःप्रजाः मयिलीनाः बभूवुः ताः यथा पूर्वं-
सृज मैत्रेयउवाच एवंजगत्स्रष्टुः स्वेनरूपेणइदंसृज्यंप्रकाश्यपद्मनाभःतिरोदधे ४४ इतितृतीयेनवमः ९ विदु
रउवाच भगवतिअंतर्हितेसति ब्रह्मादैहिकीःमानसीश्चप्रजाः कतिधाससर्ज हेभगवन् मयायेन्येप्रश्नाःकृताः तांश्चवद ४
मैत्रेयउवाच ततःब्रह्मापिदिव्यवर्षशतंतपःतेपे तपसाविद्यायायुक्तः अंभसासहवायुंपीतवान् ततःपद्मकोशंप्रविश्यतंचतुर्दश

लोकरूपेण कल्पयामास विदुरउवाच हेब्रह्मन् बहुरूपस्यहरेः कालाख्यंलक्षणंनः वर्णय मैत्रेयउवाच गुणानांव्यतिकरः
आद्यंतशून्यः सकालइत्यभिधीयते ईश्वरः तेननिमित्तभूते नात्मानंविश्वरूपेणासृजत् यथाइदानींविश्वंअस्ति तथापूर्वंआसीत् त
थाप्राकृतादिसर्गान् शृणु तत्रसर्गोनवविधः प्राकृताः षट् ६ वैकृताः ३ प्राकृतवैकृतोयः सः दशमः तत्राद्योमहतः सर्गः १ अहंकारस्य
२ महाभूतानांतृतीयः ३ इंद्रियाणां ४ देवतानां ५ पंचपर्वाविद्यायाःतमसः ६ एतेप्राकृताः वृक्षाणां ७ सः षड्विधः वनस्पतिः १ औष-
धिः २ लता ३ त्वक्सार ४ वीरुध ५ द्रुमा ६ इतितिरश्चां ८ सः अष्टाविंशतिधः गौरजोमहिषः कृष्णाः सूकरोगवयोरुरुः द्विशफाः पशव
श्चेमे अविरुष्ट्रश्चसत्तम खरोश्वोश्वतरोगौरः शरभश्चमरीतथा एतेचैकशफाःक्षत्तःशृणुपंचनखान् पशून् श्वासृगालोवृकोव्या
घ्रोमार्जारः शशशल्लकौ सिंहः कपिर्गजः कूर्मोगोधाचमकरादयः एते पंचनखाः कंकगृध्रवटश्येनभासभल्लूकबर्हिणः हंससा
रसचक्राव्हकाकोलूकादयःखगाः एवंअष्टाविंशतिभेदाः नृणां ९ एकविधः उभयात्मकः कुमाराणां १० वैकृत एवसर्गः देवानांसः
अष्टविधः देवाःपितरः असुराः गंधर्वाप्सरसः यक्षरक्षांसि भूतप्रेतपिशाचाः सिद्धचारणविद्याधराः किन्नरादयः ८ इमेदशसर्गाः
ब्रह्मणाकृताः अतः परंवंशान् मन्वंतराणिचकथयामि श्रीहरिः एवंआत्मानंसृजति ३० इतितृतीयेदशमः १० मैत्रेयउवाच
कालमानंशृणु सूर्यः यावताकालेन परमाणुदेशमतिक्रम्ययाति तावान् परमाणुः कालः तौद्वौअणुः तेत्रयः त्रसरेणुः सः जालार्के दृ
श्यते तेत्रयः त्रुटिः तासांशतंवेधः तैः त्रिभिः लवः तेत्रयःनिमेषः तेत्रयः क्षणः ते पंचकाष्ठा ताः पंचदशलघुः ते पंच दशनाडिका ते द्वे मुहू
र्तः सप्तनाडिकाः नृणांयामः अष्टौयामाः मर्त्यानांदिवारात्री ताः पंचदशपक्षः सः शुक्लकृष्णासंज्ञः तौ द्वौएकोमासःतत्पितृणांअहर्निशम्
तौद्वौ ऋतुः तैःत्रिभिः अयनं तत् दक्षिणंउत्तरंचते अयनेदेवानांअहोरात्रंतत् नृणांवत्सरम् एवंनृणामायुः संवत्सरशतं विदुरउवाच

ओ॰१ संवत्सरंपरिवत्सरं इडावत्सरं अनुवत्सरम् वत्सरमिति॰

पितृदेवमनुष्याणां आयुः त्वयोक्तं श्रुतं येतु त्रैलोक्याद्बहिः तेषांगतिंवद मैत्रेयउवा॰ कृतंत्रेताद्वापरंच कलिश्चेतिचतुर्युगम् देवानां
द्वादशसहस्त्रवर्षैः भवति कृतेधर्मः चतुष्पात् अन्येषुक्षीयते चतुर्युगसहस्त्रं ब्रह्मणोदिनं तावतीनिशा ब्रह्मदिनेमनवः१४ भवंति प्रति
मन्वंतरे भगवान् अवतरति ब्रह्मदिनात्ययेस्वपति तदा भूराद्याः त्रयोलोकाः प्रलयायकल्पंते तदाभृग्वादयः जनलोकं यांति तदासलिले
शेषासनः हरिः शेते एवं अहोरात्रैः ब्रह्मणः आयुः शतंगतमिव तस्यआयुषः अर्द्धंपरार्द्धमभिधीयते तत्रपूर्वः अपक्रांतः पूर्वपरार्द्धादौब्रा-
ह्मकल्पोभूत् तदंते पाद्मः इदानींतुवाराहः कल्पः सः द्वितीयादौकथितः एवंद्विपरार्द्धाख्यकालः अनंतस्यनिमेषवत् उपचर्यते एवंपरमा
ण्वादिद्विपरार्धांतः कालः पूर्णस्य संख्यातुं नकोपिसमर्थः अयं आंडकोशः पंचाशत्कोटियोजनविशालः अष्टप्रकृतिभिः दशोत्तराधिकैः
युतः सः ईश्वरे परमाणुवत् लक्ष्यते यस्मिन् अनंते एवं कोटिशः अंडराशयः प्रतिरोमं संति तत् अक्षरं ब्रह्म आहुः ४१ इतितृतीये एकादशः
११ मैत्रेयउवाच परमात्मनः कालरूपंतेउक्तम् अथब्रह्मायथाअस्त्राक्षीत् तत्निबोध प्रथमंतामिस्त्रंमहामोहंमोहं तमश्च एवंपंच
पर्वांविद्यांससर्ज तांपापीयसींसृष्टिं दृष्ट्वा मनसा सनकादिचतुरः ससर्ज तान् सृष्टिं कुरुतेति अकथयत् तेमोक्षधर्माणः तन्नैच्छत् तदाता
न् प्रतिक्रुद्धः ब्रह्मा तंक्रोधं नियंतुं उपचक्रमे सः धियानिगृह्यमाणोपि प्रजापतेर्भुवोर्मध्यात् मन्युः कुमारः सद्योजातः सः रुदन्मे नामानि-
स्थानानिच कुरु इति उवाच तदाब्रह्मातवनामरोदनात् रुद्रइति उवाच तस्यनामानि एकादश मन्युः१ मनुः२ महिनसः३ महान्४ शिवः५
ऋतुध्वजः६ ऊर्ध्वरेताः७ भवः८ कालः९ वामदेवः१० धृतव्रतः११ इति तत् स्थानानि हृत्१ इंद्रियाणि२ असुः३ व्योम४ वायुः५ अग्निः६ जलम्
७ मही८ सूर्यः९ चंद्रः१० तपः११ इति तत्पत्न्यः धीः१ धृतिः२ उशना३ उमा४ नियुत्५ सर्पिः६ इला७ अंबिका८ इरावती९ स्वधा१० दीक्षा११ इ
ति एवं एतानि दत्वा आभिः प्रजाः सृज इत्युक्ते तेन अनेकरुद्राणांयूथानि सृष्टानि तत् दृष्ट्वा हे रुद्र प्रजापतिः अलं तपः आतिष्ठ एवंश्रुत्वा तप

सेइलावृत्तं नामवनंविवेश ततःब्रह्मादशपुत्रान् अजनयत् तेच ब्रह्मणउत्संगात् नारदोजातः १ अंगुष्ठात् दक्षः २ प्राणात् वसिष्ठः ३
त्वचः भृगुः ४ कराक्रतुः ५ नाभितःपुलहः ६ कर्णयोःपुलस्त्यः ७ मुखात् अंगिराः ८ अक्ष्णःअत्रिः ९ मनसःमरीचिरिति ११ ततःस्तनात् धर्मः
पृष्ठतःअधर्मः हृदिकामः भ्रुवःक्रोधःअधरात् लोभः मुखाद्वाणी मेंढ्रात् समुद्राःपायोःनिर्ऋतिः छायायाःकर्दमप्रजापतिः इत्यादिसृष्ट्वा
स्वकन्यांवाचंरंतुमनश्चक्रे तदामरीच्यादयःनिषेधंचक्रुःतदालज्जितःब्रह्मातांतनुंतत्याज तत्तमः जातम् तत् दिशःजगृहुःएकदाब्र-
ह्मणोमुखेभ्यः ऋग्यजुःसामाथर्वाख्याःवेदाःपूर्वादिक्रमेणजाताःतथाआयुर्वेदं धनुर्वेदंगांधर्ववेदंशिल्पाख्यंवेदमिति उपवेदान्
इतिहासपुराणानि पंचमंवेदंच ससर्ज सोमादियज्ञान् विद्यादानंतपःसत्यमिति धर्मस्यपदानि आश्रमान् तद्वृत्तीः व्याहृतयःअक्षर
समुदायम् स्वरादीनिमनसैवससर्ज तथापिब्रह्मास्वसृष्टिवृद्धिंअदृष्ट्वास्वदेहात् पुरुषस्त्रियौससर्जसः स्वायंभुवःमनुःसास्त्रीशत
रूपा ताभ्यांमिथुनधर्मेण प्रजावृद्धिरभवत् मनोःपुत्रौप्रियव्रतोत्तानपादौजातौ आकूतिः देवहूतिः प्रसूतिरितितिस्त्रः कन्याःतास्वरु
चयेआकूतिंददौ कर्दमाय देवहूतिम् दक्षायप्रसूतिम् यतःजगत् आपूरितम् ५५ इतितृतीयेद्वादशः १२ श्रीशुकउवा० मैत्रे
यस्यपुण्यतमांवाचंनिशम्यक्षत्तापुनःपप्रच्छ विदुरउवाच स्वायंभुवःमनुःप्रियांपत्नींप्राप्यततःकिंचकार मैत्रेयउवाच
मनुःसभार्यः प्रांजलिःसन् ब्रह्माणंउवाच हेभगवन्नः त्वंपिता तेशुश्रूषाकेन भवेत्तद्वद तुभ्यंनमः ब्रह्मोवाच हेतात अहंतुभ्यं
प्रीतः पुत्रैःपितुःआज्ञाकर्तव्या इयमेवगुरोःपूजा अतः त्वंअस्यांअपत्यानि उत्पाद्य धर्मेणपृथ्वींपालयन् यज्ञैः हरिं यज इत्यादि मनु
रुवाच हेभगवन् ते आज्ञांवर्ते प्रजानांयत् वासस्थानंसामही अंभसिमग्ना अस्याःउद्धरणे यत्नःविधीयताम् मैत्रेयउवाच
परमेष्ठी अपांमध्ये मग्नांभुवंवीक्ष्य कथंएनांउन्नेष्ये इतिध्यायतः ब्रह्मणःनासाविवरात् अंगुष्ठपरिमाणःवराहतोकःनिरगात् तदा

मरीचिप्रमुखैः कुमारैश्च सहकिमेतदितितर्कयामास सः क्षणात् गंडशिलासमो भूत्वा जगर्ज तत् श्रुत्वा जनस्तपः सत्यनिवासिनः अयं
यज्ञवराह इति वेदत्रयेण अस्तुवन् सः महद्रूपं कृत्वा प्रलयोदकं प्रविश्य पृथिव्याः स्थानं घ्राणेन जिघ्रन् प्रलयोदकं संक्षोभ्य रसातलात् पृ
थ्वीं दंते कृत्वा आगच्छंतं तदैव गदयाभिपतंतं हिरण्याक्षं हत्वा तद्रक्तपंकांकितगंडतुंडः ऊर्ध्वं निर्गतः तदा ऋषयः तुष्टुवुः हे यज्ञभावन त्व
याजितं जितं स्वांतनुं धुन्वते ते नमः तवांगानि यज्ञपात्राणि तव सर्व शरीरं यज्ञरूपं सर्वमंत्रदेवताद्रव्यक्रतुक्रियात्मने जगद्गुरवे ते नम इति
स्तुवत्सु सत्सु रसायाः आनीतां पृथ्वीं अप्सु न्यस्य स्वशक्त्या स्थिरां कृत्वा हरिः ययौ यः एतां हरेः कथां शृणुयात् श्रावयेद्वा तस्य जनार्दनः
आशु प्रसीदति तस्मिन् प्रसन्ने सति किं दुर्लभम् इमां भवापहां भगवत्कथासुधां कर्णांजलिभिः पीयकः न मुच्येत् ५० इति तृतीये त्र
योदशः १३ श्रीशुकउवाच मैत्रेयेण सूकरात्मनः हरेः वर्णितां कथां निशम्य नातितृप्तः पुनः पप्रच्छ विदुरउवाच हे मुनिश्रेष्ठ
यज्ञमूर्तिना क्षोणीं उद्धरता तेन दैत्यराजस्य मृधः कुतो भूत् मैत्रेयउवाच हे वीर त्वया साधु पृष्टम् पूर्वं देवानां पृच्छतां ब्रह्मणा इतिहा
सः कथितः सः मया श्रुतः तं शृणु एकदा दक्षकन्या दितिः अपत्यकामा सती संध्यायां अग्निं इष्ट्वा होमशालायां स्थितं पतिं कश्यपं चक-
मे दितिरुवाच हे विद्वन् त्वत्कृते कामः मां दुनोति प्रजावतीनां सपत्नीनां समृद्धिभिः दह्यमानायाः मम कल्याणं कुरु इति श्रुत्वा तां
कश्यपउवाच हे भीरु ते कामं विधास्यामि किंच तव प्रजारूपं कामं करवाणि मुहूर्तं प्रतीक्षस्व हे साध्वि अस्यां संध्यायां भगवान् भू
तैः परीतः वृषेण अटति ब्रह्मादयः यदाज्ञाधारकाः तस्य पिशाचवदाचरणं अनुकरणम् मैत्रेयउवा॰ दितिः एवं श्रुत्वापि वेश्येव
भर्तुर्वसः जग्राह तदा कश्यपः भार्यायाः विकर्मणि निर्बंधं ज्ञात्वा दिष्टाय नत्वा तया सह रहसि उपविवेश अथ स्नात्वा प्राणान् आयम्य गा
यत्रीं जजाप दितिः तेन कर्मणा व्रीडिता सती अधोमुखी पतिं अभाषत हे ब्रह्मन् रुद्रः मदपराधात् मे गर्भं मावधीत् तस्य अहं अपराधं

कृतवती शिवायनमः सः भामः नः प्रसीदताम् इतिश्रुत्वानिवृत्त संध्यानियमः कश्यपः आह हे अभद्रे चित्तस्य अशुद्धत्वात् मुहूर्तातिक्रम दोषात् ममाज्ञालंघनात् देवहेलनाच्च तवजठरे अधमौ द्वौपुत्रौ भविष्यतः तौ सर्वान् दुःखंदास्यतः किंच प्राणिनांहन्यमानानांदीनानाम कृतागसाम् स्त्रीणांनि गृह्यमाणानांकोपितेषुमहात्मसु तदाविश्वेश्वरः अवतीर्यतौ हनिष्यति दितिरुवाच पुत्रवधंभगवतः आशासे क्रुद्धात् ब्राह्मणात् माभवतु नरकस्थाअपिब्रह्मदंडदग्धंनगृण्हंति कश्यपउवाच तवपश्चात्तापोजातः अतः तेपौत्रः साधुर्भविष्यति तंमहाभागवतंत्वंद्रक्ष्यसि मैत्रेयउवाच भागवतंपौत्रंभाव्यं पुत्रयोश्चकृष्णात् वधंश्रुत्वादितिः भृशंआनंदं प्राप ५० इतितृतीयेचतुर्दशः १४ मैत्रेयउवाच हेविदुर दितिः तत् काश्यपंवीर्यंउदरेशतवर्षंदधार तेनवीर्येणब्रह्मांडेअंधकारः अभूत् तदालोकपालाः संविग्नाः संतः ब्रह्माणंगत्वा प्रार्थयामासुः हे भगवन् तवएतत् अज्ञातंन तथापिवयंभीताः निवेदयाम हेदेव इदंकाश्यपंतेजः दितेर्गर्भः दिशः अंधीकुर्वन् वर्तते अस्मात् नः शंत्वंविधत्स्व मैत्रेयउवा० तदाब्रह्माप्रहस्यदेवान् उवाच हेदेवाः युष्मत्पूर्वजाः मेमानसाः सनकादयः पुत्राः निरिच्छाः संतः लोकेषुचेरुः एकदातेवैकुंठंययुः यत्रपुरुषाः सर्वेवैकुंठमूर्तयः हरिं आराधयंति यत्रभगवान् आस्ते यत्रनैश्रेयसं नामवनं यत्रवैडूर्यमारकतहेममयैः अनेकविमानैः स्त्रीभिः सहदेवाः पर्यटंति यत्रलक्ष्मीः भगवत्पदांबुजंलालयति यत्रअधर्मिष्ठाः नगच्छंति भक्ताएवव्रजंति तत्रयोगमायाबलेन सनकादयः गत्वावैकुंठंअवलोक्यपरां मुदंआपुः तस्मिन् षट्कक्षाः अतीत्यससमे सगदौउत्कृष्टवेषौ जयविजयौअचक्षत तौचतुरः कुमारान् वातरशनान् वीक्ष्य वेत्रेणनिवारितवंतौ तदाहरेः द्वारपालाभ्यांनिषिद्धमानाः ईषत् क्रुद्धाः कुमाराः ऊचुः अहोइहवसतांकोवाअयंविषमस्वभावः इहअनंतवसतोयुवाभ्यामेवभेदः उत्पादितः अतः इहवस्तुं नार्हौ अतः इमेकामक्रोधलोभाः यत्रसंति तंलोकंगच्छतं इतिउभौतौअनिवार्यं ब्रह्मशापंश्रुत्वाह

ओ० ७ इंद्रादयः ओ० ३ प्राकारद्वाराणि०

रेः अनुचरावपि उरुबिभ्यतः तेषां पादग्रहणं कुर्वंतौ दंडवत् अपतताम् ऊचतुश्च नौ भवद्भिः दंडः कृतः सः अधः व्रजतोः नौ भगवत्स्मृतिघ्नः
माभूत् एवं तदेव भगवान् स्वानां सदतिक्रमं ज्ञात्वा श्रिया सह तत्र ययौ सर्वैश्वर्ययुक्तं हरिं दृष्ट्वा कुमारा ऊचुः हे भगवन् भवदुद्भवेन नः पि
त्रा पूर्वं त्वं वर्णितः तथापि सः त्वं नयनैः अद्य दृष्टः तं त्वां परमात्मानं विद्वाम अद्य वयं कृतार्थाः तुभ्यं नमः विधेम ५० इति तृतीये पंचदशः १५
ब्रह्मोवाच इति गृणतां मुनीनां वचः प्रतिनंद्य विभुः जगाद श्रीभगवानुवाच एतौ जयविजयौ मत्पार्षदौ मां तुच्छीकृत्य वः अतिक्रमं कृ
तवंतौ भवद्भिः एतयोः यो दंडः कृतः स एव अस्माभिः अनुमतः कुतः मे ब्राह्मणाः परं दैवतं अतः वः प्रसादयामि दूतैः यः कृतः अपराधः सः
मयैव कृत इति मन्ये वः प्रतिकूलवृत्तिं स्वबाहुमपि छिंद्यां किंच ब्राह्मणसेवया पवित्रं मां श्रीः न जहाति अहं यज्ञे अग्निमुखेन तथा न अ
द्मि यथा ब्राह्मणमुखेन ये ब्राह्मणान् मद्बुध्या अर्चयंति तैः अहं वशीकृतः इमौ ममाभिप्रायं अजानंतौ युष्मदपराधं कृतवंतौ इमौ पुनः
अल्पकालेनैव ममांतिकं यातं एवं अनुग्रहः कर्तव्यः ब्रह्मोवाच अथ भगवद्वाक्यं श्रुत्वा प्रांजलयः कुमाराः ऊचुः हे भगवन् तव
चिकीर्षितं वयं न विद्मः सर्वेश्वर त्वं मयि अनुग्रहः क्रियतामिति भाषसे किंच विप्राणां देवानां च आत्मदैवतं त्वमेव ते ब्राह्मणाः परं
दैवतं मे इति वदसि अस्तु अहो धर्मः ते अवतारैः रक्ष्यते तवानुग्रहाद्योगिनः अंजसा मृत्युं तरंति तस्मै तुभ्यं नमः अस्माभिः अनयोः दं
डः कृतः सः भगवता अनुमंतव्यः अथवा तं निराकुर्वन् अस्मासु उचितः दंडः ध्रियतां तत्सर्वं वयं मन्यामहे श्रीभगवानुवा॰ एतौ
सद्यः असुरयोनिं प्राप्य क्रोधसमाधिना मयि बद्धवैरौ भूयः जन्मत्रयेण मत्सकाशं आशु एष्यतः हे विप्राः अयं शापः मयैव निर्मित इति
जानीत ब्रह्मोवाच अथ ते मुनयः वैकुंठलोकं दृष्ट्वा भगवंतं प्रणम्य वैष्णवीं श्रियं शंसंतः प्रतिजग्मुः भगवान् अनुगौ आह हे पा
र्षदौ मयि संरंभयोगेन ब्रह्महेलनं निस्तीर्य मे समीपं अल्पकालेन प्रत्येष्यत युवां शं अस्तु इत्यादिश्य हरिः स्वस्थानं ययौ ततः वैकुंठगत

सद्यः पतमानयोः सतोः विमानेषु हाहाकारः आसीत् अधुना हे देवाः तौ दितेः जठरे प्राप्तौ तयोः तेजसा वः तेजः आक्षिप्तम् भगवान् शं
विधास्यति तत्र अस्मद्विचारेण कियान् अर्थः ३६ इति तृतीये षोडशः १६ मैत्रेय उवाच देवाः ब्रह्मवाक्यं निशम्य स्वस्था-
नं ययुः दितिः पूर्णे वर्षशते यमौ पुत्रौ प्रसुषुवे तयोर्जायमानयोः दिवि भुवि अंतरिक्षे च उत्पाताः बभूवुः पर्वतैः सह भुवः चेलुः दिशः जज्व
लुः उलूकस्वन केतूदय रक्तवृष्ट्यादि अभवत् प्रजाः अन्यांश्च महोत्पातान् दृष्ट्वा भीताः सत्यः ब्रह्मपुत्रान् ऋते विश्वप्रलयं मेनिरे तौ आ
दिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ लोहवत् कायेन अद्रिपती इव ववृधाते हेमकिरीटकोटिभिः दिविस्पृशौ संतौ कव्या अर्क अतीत्य त
स्थतुः कश्यपः तयोर्नाम अकार्षीः ज्येष्ठं हिरण्यकशिपुं अनुजं हिरण्याक्षमिति ततः हिरण्यकशिपुः ब्रह्मवरेण त्रैलोक्यं वशं चक्रे हि
रण्याक्षः गदापाणिः युयुत्सुः रणं मृगयन् स्वर्गं बभ्राम देवास्तं दृष्ट्वा भीताः संतः निलिल्यिरे सः देवान् अदृष्ट्वा भृशं व्यनदत् ततः क्रीडि
ष्यन् वार्धिं प्रविवेश तं दृष्ट्वा वरुणदूताः जलचराः अपलायन् सः अनेकवर्षं जलधौ क्रीडन् वरुणपुरीं गदया जघ्ने तत्र वरुणं दृष्ट्वा हिर
ण्याक्षः उवाच हे लोकपाल त्वं पुरा अखिलदैत्यादीन् विजित्य राजसूयेन अयजत् तस्मात् मे युद्धं देहि वरुण उवाच हे दैत्य वयं यु
द्धात् इदानीं उपरमं प्राप्ताः त्वां युद्धे तोष्टुं पुराणपुरुषात् अन्यं न पश्यामि हे वीर तं प्राप्य रणांगणे श्वभिः वृतः शयिष्यसे यः त्वद्विधानां
प्रशांतये सदनुग्रहेच्छया रूपाणि धत्ते तं प्राप्य रणांगणे शयिष्यसे ३१ इति तृतीये सप्तदशः १७ मैत्रेय उवाच एवं जलेशभा
षितं आकर्ण्य तत् अविगणय्य नारदात् हरेः गतिं विदित्वा त्वरया रसातलं विवेश तत्र पृथ्वीं दंष्ट्रया उन्नीयमानं वराहं दृष्ट्वा अहो वन
गोचरः मृगः उच्चैः जहास आह च हे सूकर हते ब्रह्मणा इयं पृथ्वी रसौकसां नः अर्पिता इमां मुंच मुंच मे ईक्षतः सतः अनया सह त्वं सुखं
न यास्यसि त्वं परोक्षं अस्फुरान् हंसि गदया त्वां हत्वा सुहृदां शुचः प्रमृजे त्वयि संस्थिते सति सर्वे देवाः निर्मूलाः भविष्यंति इत्याद्युक्तोपि

भगवान् पृथ्वीं गृहीत्वा सलिलोपरि आगत्य स्वशक्त्या पृथ्वीं न्यस्य देवैः स्तुतः प्रचंडमन्युः हिरण्याक्षं बभाषे वराह उवाच भो
वयं वनगोचराः सत्यं युष्मद्विधान् ग्रामसिंहान् मृगये बलिना वैरं उत्पाद्य वयं क्व यामः अतः त्वं मां संस्थाप्य स्वकानां शुचः आशु प्र
मृज यः स्वप्रतिज्ञां त्यजति सः असभ्य इति मैत्रेय उवाच एवं श्रुत्वा हिरण्याक्षः गदया हरिं अभ्यहनत् वराहः प्रहारं अवंचयत्
सः पुनः अभ्यधावत् तौ मिथः गदाभ्यां जघ्नतुः उभयोः शरीरात् रुधिरं सुस्राव एवं युद्ध्यतोः सतोः तत्र ब्रह्मा एत्य उवाच हे भगवन्
एषः त्वच्छरणागतानां देवविप्रसौरभेयीणां आगस्कृत् एनं बालवत् मा क्रीड एषः यावत् संध्यां प्राप्य न वर्द्धेत तावत् हे अच्युत एनं
जहि अधुना अभिजिन्नाम योगः किंचित् शेषोस्ति नः शिवाय एनं हत्वा लोकान् शर्मणि आधेहि २८ इति तृतीयेऽष्टादशः १८
मैत्रेय उवाच हरिः ब्रह्मणः वचः अवधार्य प्रहस्य अपांगेन अवलोक्य तद्वचः अग्रहीत् ततः अग्रे स्थितं दैत्यं हरिः गदया जघा
न ततः दैत्येन स्वगदया हता भगवद्गदा हस्तात् अपतत् तदद्भुतमिवाभवत् हाहाकारश्च अभूत् ततः भगवान् चक्रं जग्राह तदा खेच
राणां वाचः ते स्वस्तीति अमुं जहीति आसन् तदा क्रुद्धः दैत्यः हतोसि हतोसि इत्युक्त्वा हरिं गदया अहनत् भगवान् तां गदां वामपादेन प्राह
रत् तदा दैत्यः शूलं चिक्षेप भगवान् चक्रेण तत् चिच्छेद पुनः दैत्यः मुष्टिना हरिं प्रहृत्य अंतर्धाय बहुधा मायाः असृजत् चंडाः वायवः
प्रववुः दिग्भ्यः ग्रावाणः पेतुः मेघाः केशासृग्विण्मूत्रास्थीनि ववर्षुः गिरयः नानायुधमुचः अदृश्यंत किंच नग्नाः राक्षस्यः अदृश्यंत
तथा यक्षरक्षोभिः छिंधि भिंधि एवं वाचः उत्सृष्टाः इत्यादि तदा भगवान् सुदर्शनास्त्रेण सर्वमायाः अनाशयत् तदा दितेः हृदि वेप
थुः अभवत् स्तनात् असृक् सुस्राव दैत्यः स्वमायासु नष्टासु सत्सु पुनः केशवं एत्य मुष्टिभिः निजघान तदा भगवान् करेण कर्णमूले ८
जघान तेन प्रहारेण हिरण्याक्षः भूमौ पतितः सन् तनुं उत्ससर्ज ततः अजादयः देवाः एत्य शशंसुः हे हरे अखिलयज्ञतंतवे तेनमः अहो

इमांसंस्थितिंकोनुलभेत अस्यभाग्यंकिंवर्णनीयम् मैत्रेयउवाच एतौविष्णुपार्षदौशापात् असद्गतिंयातौ पुनःकतिपयैः
जन्मभिःस्थानंप्रपत्स्येते एवंआदिसूकरः हिरण्याक्षंहत्वा अंतर्हितः इदंआख्यानंयःशृणोति श्रावयेत् सःब्रह्मवधादपिमुच्यते ए
तत् महापुण्यंधन्यंयशस्यंशृण्वतांअंतेनारायणःस्वगतिंददाति ३८ इतितृतीयेएकोनविंशः १९ शौनकउवाच मनुःमहीं
स्थानंप्राप्य प्राणिनःकैरुपायैःसृष्टवान् तथाविदुरःमैत्रेयंगंगाद्वारेस्थितंकिमपृच्छत् तयोःसंवदतोःप्रवृत्ताःयाःहरिकथाःताःनः
कीर्तय एवंपृष्टःसूतःआह हेशौनक आदिवराहस्यचरितंश्रुत्वा जातहर्षोविदुरःमैत्रेयंप्राह विदुरउवाच ब्रह्मामरीच्यादी
न् सृष्ट्वाकिमारभत किंच येमरीच्यादयःमनुश्चतेइदंकथमुत्पादयामासुः मैत्रेयउवाच उत्पन्नाःमहदादयःअंडंअसृजन्
तन्मध्येविराड्रूपस्यविष्णो[illegible]भिपद्मात् ब्रह्माभूत्वाआदौसःस्वच्छायया अविद्यांससर्ज तांतनुंअत्यजत् सारात्रिःअभवत्तां
यक्षरक्षांसिजगृहुः ततःब्रह्मास्वप्रभयादेवान् असृजत्तेनविसृष्टांप्रभांदिवसःअभवत् तंदेवाजगृहुः ब्रह्माजघनात् असुरान्
असृजत् तेमैथुनायप्राप्ताः ततोब्रह्माभीतः पलायित्वा हरिंशरणंजगाम हरिणा उक्तःब्रह्मातांतनुंविससर्ज सासंध्यास्त्रीरूपिणी
अभवत् तेअसुराःक्कणच्चरणांभोजांस्फनासांसुदतींदृष्ट्वाअहोरूपमहोधैर्यं॰ कात्वंकस्यासीत्याद्युक्त्वातांस्त्रियंमत्वाजगृहुः
ब्रह्माप्रहस्यकांत्यागंधर्वाप्सरसः ससर्ज तेनत्यक्ता तनुःज्योत्स्नाअभवत् तांविश्वावसुपुरोगमाःजगृहुः ब्रह्मास्वालस्येनभूतपि
शाचान् असृजत् दिगंबरान् तान् वीक्ष्यदृशौअमीलयत् तेनत्यक्तांजृंभमाणाख्यांतनुं तेजगृहुः ययाजनेषुनिद्राइंद्रियस्राव-
श्च दृश्यते ब्रह्मास्वबलेन परोक्ष्येणसाध्यान् पितृगणांश्च असृजत् तेतांज॰तिरोधाननसिद्धान् विद्याधरान् असृजत् तेतांज॰ प्र
तिबिंबेनकिन्नरान् किंपुरुषान् असृजत् ते॰ बहुचिंतयाशयानःब्रह्मासृष्टिवृद्धिंअदृष्ट्वाक्रोधात् वपुःउत्ससर्ज तदाकेशपादाद्याकुं

चनतः सर्पादिनागाःजाताः अथब्रह्माएकदा आत्मानं कृतकृत्यंमन्यमानः मनून् ससर्ज तेभ्यः पौरुषींतनुंददौ एकदाब्रह्मातपोयोगवि
द्यासमाधिभिः ऋषीन् ससर्ज तेभ्यः तपआदिअदात् ५२ इतितृतीयेविंशः २० विदुरउवाच स्वायंभुवस्यमनोःवंशःकथ्यता
म् यत्रमैथुनेनप्रजाःएधिरे तस्यप्रियव्रतोत्तानपादौपुत्रौ सप्तद्वीपवतींमहींधर्मेचरक्षतुः तस्यदुहितादेवहूतीसाकर्दमस्यपत्नी त्वया
उक्तातस्यांसः कतिधावीर्यंससर्ज रुचिः आकूत्यांदक्षःप्रसूत्यांचयथासृष्टिंचक्रतुः तद्वद मैत्रेयउवाच ब्रह्मणा प्रजाः सृजइत्यु
क्तः कर्दमः सरस्वत्यांदशसहस्रवर्षाणिभक्त्याहरिंध्यायन् तपस्तेपे भगवान् कृतयुगेप्रसन्नः सन् तंप्रत्यक्षः अभूत् कर्दमः हरिं
दृष्ट्वालब्धमनोरथः क्षितौमूर्ध्नापतन् तुष्टाव कर्दमउवाच हे भगवन् तेदर्शनात् मे अक्ष्णोः सांसिद्ध्यंजातम् येकामार्थं
तेचरणारविंदंभजंते तेमूढाएव तथापि अहंस्त्रीकामः ते कामपूरकं अंघ्रिंनमामि इत्यादि तद्वचः श्रुत्वा भगवानुवाच हे कर्दम
तवेच्छांज्ञात्वा एतत्पुरे वसमयोजि मनुःपरश्वः स्वस्त्रियाशतरूपयासह त्वत्समीपंएत्यदेवहूतींस्वांकन्यांतवदास्यति त्वत्तः त-
स्यांनवकन्याः भविष्यंति ऋषयःतवकन्यासुसृष्टिंकरिष्यंति अहंकलयात्वद्वीर्येणतवक्षेत्रेदेवहूत्यांभूत्वातत्त्वसंहितांप्रणेष्ये
मैत्रेयउवाच इत्युक्त्वाभगवान् अंतर्हितः कर्दमश्चबिंदुसरोवरेतंकालंप्रतीक्षन् तस्थौ तदामनुःपत्नीकन्याभ्यांसहस्यंदनमा
स्थायभगवदाज्ञयाबिंदुसरोवरसमीपे कर्दमस्यआश्रमंअगात् कीदृशंतं ऋषिसेवितंनानापक्षिमृगाकीर्णंकदंबबकुलाशोककुंद
मंदारकुटजचूतपनसादिभिरन्वितंकारंडवहंसादिभिरन्वितंसरोवरंच दृष्ट्वा तत्रासीनंमुनिं ददर्श अथमुनिः आयांतंमुनिंदृष्ट्वा
सपर्ययातंपूज्य आसीनंमनुं उवाच हेदेवतवागमनंसतांरक्षणाय असतांवधाय त्वंहरेःपालिनीशक्तिरसि हेवीरत्वांपृच्छे त्वंयदर्थंइ
हआगतः वयंतत् हर्षेणस्वीकुर्महे ५६ इतितृतीयेएकविंशः २१ मैत्रेयउवाच एवंउक्त्वाउपरतंमुनिंमनुरुवाच हेमुनेब्रह्मावेद

प्रवर्तनेच्छया युष्मान् ब्राह्मणान् असृजत् तत्त्राणाय बाहुतः अस्मान् क्षत्रियान् असृजत् तस्य हृदयं ब्रह्मक्षत्रं अंगं इति वदंति अतः अ
न्योन्यं ब्रह्मक्षत्रं च रक्षतः तव दर्शनादेव मे सर्वसंशयाः छिन्नाः शिवं तस्मात् रजः मे शीर्ष्णा स्पृष्टं एतत् दिष्ट्या त्वं मे श्रावितं कृपया श्रोतुं
अर्हसि प्रियव्रतोत्तानपदोः स्वसा मे कन्या इयं नारदात् तव गुणादीन् श्रुत्वा त्वयि कृतनिश्चया आसीत् हे द्विजाग्र्य मया श्रद्धया उपाहृ
तां त्वं स्वीकुरु उपस्थितस्य त्यागो विरक्तस्यापि नोचितः किंपुनः कामरक्तस्य त्वं च उद्वोढुकामः इति अशृणवम् कर्दम उवाच
अहं उद्वोढुकामः इति त्वदुक्तं बाढम् अहं इमां समयेन भजिष्ये यावत् मे वीर्यं बिभृयात् तावत् पश्चात् पारमहंस्यान् धर्मान् बहुमन्ये
तदा मनुः गुणगणाढ्याय कर्दमाय तुल्यां कन्यां दत्वा हर्षितो बभूव शतरूपा दंपत्योः भूषावासःपरिच्छदान् पारिबर्हान् ददौ एवं विवाहं
कृत्वा तद्विरहं अशक्नुवन् बाष्पकलां मुंचन् अंब वत्से इति वदन् मुनिं आमंत्र्य सभार्यः सानुगः सरस्वतीतीरस्थ ऋषीणां आश्रमसंपदः
पश्यन् सर्वसंपत्समृद्धां बर्हिष्मतीं नाम स्वपुरीं ययौ तस्यां धर्माविरोधेन सभार्यः प्रजाः पालयन् यथेच्छं कामान् बुभुजे सः वासुदेव
प्रसंगेन युगानामेकसप्ततिं किंचिदधिकां स्वांतरं निन्ये हरिसंश्रयं जनं क्लेशाः न बाधंते यः मुनिभिः पृष्टः सन् नानाविधान् धर्मान् प्राह
आदिराजस्य अद्भुतं चरितं ते कथितं तदपत्योदयं शृणु ३९ इति तृ० द्वाविंशः २२ मैत्रेय उवाच सा देवहूतिः पितृभ्यां प्र-
स्थिते पतिमनोवृत्तं जानती भवं प्रभुं भवानीपतिं पर्यचरत् दंभादि विसृज्य तं अतोषयत् एवं बहुकाले गते सति व्रताचरणेन कृशां
तां विलोक्य कृपापूर्णः ऋषिः तां अब्रवीत् हे मानवि अद्याहं तव तुष्टोऽस्मि मया स्वधर्माचरणेन ये भगवत्प्रसादाः प्राप्ताः ते मत्सेवया
त्वयापि वशीकृताः ते दिव्यां दृष्टिं वितरामि तया दृष्ट्या त्वं सर्वं द्रक्ष्यसि त्वं पातिव्रत्येन सिद्धासि दिव्यान् भोगान् भुंक्ष्व एवं ब्रुवाणं मु-
निं प्रति देवहूती उवाच हे भगवन् यः त्वया समयः अभिहितः सः सकृत् भूयात् हे ईश रंतुं इच्छया मया आत्मा कर्शितः सः देहः यथा रतिस

मर्थोभवेत् तथाकुरु किंच संभोगार्हं भवनंसंपादय मैत्रेयउवाच कर्दमः प्रियायाःप्रियं अन्विच्छन् योगबलेनतर्ह्येव कामगंवि
मानं अचीकरन् कथंभूतं तत् सर्वकामदुघंमणिस्तंभैः शोभितं पट्टिकादिभिः अलंकृतंनानावस्त्रैः विराजितंमरकतस्थल्याजुष्टंवज्र
खचितकपाटयुक्तं विचित्रवैतानैः हेमतोरणैः जुष्टंहंसपारावतैः तत्रतत्रकूजितं यस्मिन् विमाने इंद्रादिलोकपालैः प्रार्थनार्हाऽ एव
संपत्तिरासीत् ईदृक्गृहं दृष्ट्वानातिप्रीतमनाआसीत् तदा तस्याः चित्तज्ञः कर्दमः तां आह हे भीरु अस्मिन् बिंदुसरोवरे निमज्ज सात
त् श्रुत्वासरस्वतीमध्यस्थंसरः आविवेश तत्रसहस्त्रंकन्याः उत्पलगंधयः देवहूतिं एत्य प्रांजलयः ऊचुः वयंतवदास्यः त्वंनः शाधिइत्यु
क्तातांस्नापयित्वादुकूलेपरार्घ्यभूषणानिसर्वगुणोपेतंअन्नंअमृतमिवपानंचददुः अथदेवहूतिः आदर्शेसर्वालंकारयुक्तंतुष्टंस्वात्मा
नं दृष्ट्वासास्मृतिमात्रेणदासीभिः सहपतिसमीपंआस्तेकर्दमः विद्याधरीसहस्रेणयुक्तयास्त्रियासहविमानंआरुह्य अष्टलोकपा
लस्थानेषु वैभ्रंभादिवनेषु सिद्धैर्नुतः तयासहचिरं रेमे पत्न्यैभूगोलंसर्वं दर्शयित्वापुनः स्वाश्रमंएत्य तस्यांनवधावीर्यंआदधेसास
द्यः नवकन्याः सुषुवे साएकदापतिं प्रव्रजिष्यंतंआलक्ष्यउवाच त्वयायत्प्रतिश्रुतंतत् संपादितम् अथापित्वंप्रपन्नायाः मेअभयंदातुं
अर्हसि त्वयिवनं प्रव्रजिते सति मे विशोकाय ब्रह्मवित्पुत्रः अस्तु त्वया कन्यानांपतयः विमृग्याः ते साम्यर्थ्ये अजानती अहं भगवन्मा
ययावंचितास्मि विमुक्तिदंत्वांपतिंप्राप्य बंधनात् मोक्तुं इच्छांनकृतवत्यस्मि २७ इतितृतीयेत्रयोविंशः २३ मैत्रेयउवाच
दयालुः कर्दमः खिन्नांतांअवलोक्य भगवदुक्तंस्मरन्नाह ऋषिरुवाच हे राजपुत्रित्वंमाखिदः भगवान् ते गर्भं शीघ्रंप्राप्स्य
ति तेहृदयग्रंथिछेत्ताभविष्यति मैत्रेयउवाच भगवान् कार्दमंवीर्यंप्राप्तःसन् तस्यांदारुणि अग्निरिवजज्ञे तदाव्योम्निवादि
त्राणि अवादयन् पुष्पवृष्टिःपपात गंधर्वाप्सरसोजगुः ननृतुश्चइत्यादि ब्रह्मासांख्यशास्त्रप्रवर्तनाय अंशेनजातंभगवंतं विद्वान्

मरीच्यादिभिः तत्रएत्यकर्दमंउवाच हेपुत्रमेवचः सम्यक्कृतम् इमाःकन्याःएतेभ्यः ऋषिभ्यः त्वंदेहि आद्यंपुरुषंकपिलंतवगृहे अव
तीर्णं अहंवेद्मि हेमानवि कैटभारिः तेगर्भेप्रविष्टः अयंतव अविद्यासंशयग्रंथिंछित्वागांविचरिष्यति इत्युक्त्वाब्रह्माययौ ततःकर्द
मः मरीचयेकलांवन्यांअत्रयेअनुसूयाम् अंगिरसेश्रद्धांपुलस्त्यायहविर्भुवम् पुलहायगतिम् क्रतवेक्रियाम् भृगवेख्यातिम् वसि
ष्ठायअरुंधतीम् अथर्वणेशांतिम् ९ अदात् ऋषयः तंआमंत्र्यसस्त्रीकाः स्वाश्रमंययुः कर्दमः भगवंतं अवतीर्णंज्ञात्वा एकांतेसंग
म्य तंप्रणम्यअभाषत अहोसंसारेस्वपातकैः पच्यमानानांदेवताः बहुकालेनप्रसीदंति सर्वेयोगिनः यंत्वांध्यायंति सः त्वंस्ववा-
क्यंऋतंकर्तुंममगृहे अवतीर्णोसि तंत्वांज्ञानिभिः स्तुतंपूर्णंअहंशरणंप्रपद्ये इतः त्वांहृदिकृत्वापूर्णकामः अहंसन्यस्यगांविच
रिष्येइतिपृच्छे श्रीभगवानुवाच मयास्ववचः ऋतंकर्तुं तत्वसंख्यानायच इमंदेहंधृतंविद्धि हेऋषेकामंगच्छपरंतुमो
क्षार्थेमांभज अहंमात्रेविद्यांवितरिष्ये ययामाताभवाब्धिंतरिष्यति मैत्रेयउवाच एवंकपिलेनउदितः मुनिः तंप्रदक्षिणीकृ
त्यवनंगत्वावासुदेवेभक्तिंकुर्वन् मुक्तबंधनः कालेनभगवद्गतिंप्राप ४७ इतितृतीयेचतुर्विंशः २४ शौनकउवाच हेसूत
आत्मतत्वज्ञापनार्थंजातः कपिलः यद्यत्कर्मकरोति तानिकर्माणिकीर्तय सूतउवाच एवमेवप्रेरितः मैत्रेयः प्रीतःसन् विदुरं
आह मैत्रेयउवाच पितरिअरण्यंप्रस्थितेसति भगवान्कपिलः मातुःप्रियचिकीर्षया तस्मिन्बिंदुसरोवरे अवात्सीत् देव
हूतीधातुःवचःस्मरंती स्वसुतंआह हेभूमन् विषयाभिलाषात् अहंश्रांतास्मि येनअंधंतमःप्राप्ता तस्यतमसः पारगंसत् चक्षुः मेअ
द्यलब्धम् हेदेव अहंममेति देहेसंमोहः तंअपनेतुंत्वंअर्हसि अहंत्वांशरणंगता मैत्रेयउवाच इतिस्वमातुः पुंसांअपवर्गव
र्द्धनंवचः निशम्यसतांगतिः भगवान् बभाषे कपिलउवाच हेमातः आत्मनिष्ठःयोगःपुंसांनिःश्रेयसायमतः तंतेप्रवक्ष्यामि

अहोपुंसांचेतःविषयेषुसक्तंबंधायभवति परमेश्वरेसक्तंमुक्तयेभवति अहंममाभिमानोत्थैःकामलोभादिभिःमलैःरहितंयदाम
नःभवतितदा ज्ञानवैराग्ययुक्तेनभक्तियोगेनआत्मानंप्रकृतिंचपश्यति अखिलात्मनिमयियोगिनांब्रह्मसिद्धयेभक्त्याविनाअन्यःशि
वःपंथाःनकवयःप्रसंगंआत्मनःअजरंपाशंविदुःसएवसाधुषुकृतश्चेत् मोक्षद्वारंअपावृतम् साधुषुतुसंगःप्रार्थ्यः साधुमुखात् मक
थाश्रवणेनश्रद्धारतिर्भक्तिश्चभवति ज्ञानवैराग्ययुक्तेनभक्त्याच इहैवदेहेमांप्राप्नोति देवहूतिरुवाच त्वयियोग्याभक्तिः
कायोगश्चकः तन्मेवद यथायोषिदहं भवदनुग्रहात् सुखंबुध्येयं तथानुग्रहाण श्रीभगवानुवाच हरौसर्वेंद्रियाणांयावृत्तिः
साभक्तिःमुक्तेरपिश्रेष्ठा सालिंगदेहंक्षपयति येसर्वंविसृज्यविश्वतोमुखंमांभक्त्याभजंति तान् मृत्योःसकाशात् पारयेमङ्यात्
सर्वंभवति भक्तियोगेनमयिमनसःस्थिरीकरणंएतावानेव अस्मिन्लोकेपुंसांनिःश्रयसोदयःअस्ति ४४ इतितृतीयेपंचविंशः
२५ श्रीभगवानुवाच हेमातः तेतत्त्वानांलक्षणंमोक्षदंज्ञानंचवर्णये परमात्मनःसकाशात् प्रकृत्यादीनिपंचविंशतितत्त्वा
निउत्पन्नानितेभ्यःब्रह्मांडंउत्पन्नं तस्मिन् विराट्जज्ञे तद्देहेज्ञानकर्मेंद्रियाणिमनोबुद्ध्यादीनिदेवताभिःसहउत्पन्नानि तानिस-
लिलेस्थितंविराड्रूपंउत्थापयितुंनाशकन् पुनःतानिदेवताभिःसहतंउत्थापयितुंप्रविविशुः तदेवाह वन्हिर्वाचामुखंभेजेनोदति
ष्ठत्तदाविराट् घ्राणेननासिकेवायुर्नोदतिष्ठत्तदाविराट् अक्षिणीचक्षुषादित्योनो॰ श्रोत्रेणकर्णौचदिशोनो॰ त्वचंरोमभिरो
षध्योनो॰ रेतसाशिश्नमापस्तुनो॰ गुदंमृत्युरपानेननो॰ हस्ताविंद्रोबलेनैवनो॰ विष्णुर्गत्यैवचरणौनो॰ नाडीर्नद्यो ११
लोहितेननो॰ रुद्रोभिमत्याहृदयंनो॰ चित्तेनहृदयंचैत्यःक्षेत्रज्ञःप्राविशद्यदा विराट्तदैवपुरुषःसलिलादुदति
ष्ठत् तमस्मिन्प्रत्यगात्मानंधियायोगप्रवृत्तया भक्त्याविरक्त्याज्ञानेनविविच्यात्मनिचिंतयेत् ७१ इतितृतीयेषड्विंशः२६ श्रीभगवा

नुवाच पुरुषः देहस्थोपिदेहकृतैः सुखदुःखादिगुणैः नलिप्यते अविकारात् कइवजलार्कवत् सएवप्रकृतेःगुणेषुसक्तोभूत्वाक
र्तास्मीतिमन्यते तेनप्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषुसंसारंएति अविद्यमानोपिअर्थेजीवस्यसंसृतिर्ननिवर्तते अतएवअ-
सतांपथिसक्तंचित्तं भक्तियोगेनवैराग्येणच शनैर्वशंनयेत् यमादिमार्गैः आत्मवान्सन् ज्ञानदृष्ट्याप्रकृतेःपुरुषस्यचविचारेणआत्मा
नंउपलभेत् देवहूतिरुवाच हेकपिलअन्योन्याश्रयत्वात् प्रकृतिःपुरुषंनमुंचति यथागंधस्यभूमेश्चव्यतिरेकोन तस्मात् अक
र्तुः कर्मबंधः प्रकृतेःगुणैः भवति तस्मात् तयोः व्यतिरेकः कथंभवतीतिवद श्रीभगवानुवाच तीव्रयाभक्त्यावैराग्येणज्ञाना
दिनाच एतैरुपायैः अहर्निशंदह्यमाना पुरुषस्यप्रकृतिः शनैःतिरोहिताभवति यथाप्रतिबुद्धस्यनिद्रामोहायनकल्पते एवंविदित
तत्वस्यमयिमानसंयुंजतः प्रकृतिःनापकुरुते प्रतिबुद्धार्थःमद्भक्तः सर्वत्रजातवैराग्यः छिन्नसंशयः कैवल्याख्यंमत्स्थानंप्राप्नो-
ति यत्रमृत्युकगर्वः नतांआत्यंतिकींगतिमाप्नोति ३७ इतितृतीयेसप्तविंशः २७ श्रीभगवानुवाच हेनृपात्मजेतवयोगस्य
लक्षणंवक्ष्येशृणु योगस्तुद्विविधः सबीजोनिर्बीजश्च तत्रगीतोक्तनिर्बीजयोगस्यदुष्करत्वात् सबीजयोगस्यलक्षणंवक्ष्ये येनप्र-
सन्नंमनः सत्पथंयाति शक्त्यास्वधर्माचरणं विधर्मात् निवर्तनम् दैवात् लब्धेनसंतोषः आत्मविदांचरणार्चनम् ग्राम्यधर्मनिवृत्तिः
मोक्षधर्मरतिः मितमेध्यभोजनम् एकांतसेवनम् अहिंसासत्यम् अस्तेयं यावदर्थपरिग्रहः ब्रह्मचर्यम् तपःशौचं स्वाध्यायःपुरु
षार्चनम् मौनं आसनजयः स्थैर्यं प्राणजयः इत्याद्युपायैःमनःबुद्ध्यायुंजीत ततःआसनेस्थित्वापूरककुंभकरेचकैः प्राणमार्गंशो-
ध्यचित्तंस्थिरीकृत्यस्वनासाग्रावलोकनः प्रसन्नवदनांभोजंश्यामंचतुर्भुजंपीतवाससं वनमालादिभिः भूषितंश्रीकृष्णंध्यायेत्
स्थितंव्रजंतंआसीनंशयानंवातंध्यायेत् तत्रपादादिध्यानंकार्यम् संचिंतयेद्भगवतश्चरणारविंदं० जानुद्वयं० ऊरूनितंबंनाभिहृ

दंवक्षः कंठंबाहून् चक्रंशंखंकौमोदकीं वनमालांकौस्तुभंवदनारविंदं कुटिलकुंतलकेशयुक्तं विपुलप्रसादंअवलोकंहासम् एतादृशं
विष्णोः रूपंस्वहृदिध्यायन् तस्मिन्चित्तंनचालयेत् एवंस्वहृदयाकाशेध्यात्वाप्रतिलब्धभावः सन् ध्यातृध्येयविभागशून्यंएकं-
अखंडंआत्मानं यःईक्षते सः सुखदुःखादिकं अहंकारनिष्ठंपश्यति एवंकृते सति देहाद्युपाधिनिर्मुक्तोभूत्वाजीवन्मुक्तोभवति किं-
च स्वदेहंस्थितंउत्थितंगतंप्रासंवानपश्यति किंच देहोपि दैववशगइति यथापुत्राच्चवित्ताच्चपृथक्मर्त्यः प्रतीयते तथाआत्मा-
पिदेहात् भिन्नः एवंदुर्विभाव्यांइमांजीवप्रकृतिंयः पराभाव्यवर्ततेसः स्वरूपेणअवतिष्ठते ४४ इतितृतीयेऽष्टाविंशः २८
देवहूतिरुवाच हे भगवन् प्रकृतेः पुरुषस्यमहदादीनांच यथालक्षणंकथितं तथाभक्तियोगस्यमार्गंविस्तरेणवद जीवस्यवि
विधाः संसृतीः ईश्वररूपस्यकालस्यते स्वरूपंवद हे कपिल तमसि पतितस्य अज्ञजनस्यप्रबोधायत्वं योगभास्करः आविर्भूतो
सि श्रीभगवानुवाच हे भामिनि भक्तियोगः बहुविधोस्ति स यथाहिंसादिकं अभिसंधाय भेददर्शी मयिभक्तिंकरोति
सतामसः ऐश्वर्यादिविषयान् संकल्प्यमांअर्चेत् स राजसः पापक्षयार्थंकर्मकृत्वा ईश्वरेतदर्पणंकुर्वन् ससात्विकः एवंश्रवणकी
र्तनादिभेदेन एकाशीतिभेदाः भवंति निर्गुणाभक्तिस्तु फलानुसंधानशून्याएकाएवतांकुर्वतः जनाः मत्सेवनं विनासालोक्यादिम
यादीयमानमपितेनगृण्हंति सआत्यंतिकोभक्तियोगः ते उक्तः येनगुणत्रयंहित्वाजीवः ब्रह्मत्वायकल्पते स्वधर्मेणक्रियायोगेनअ
हिंस्रेण मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषु मद्भावनया महतां बहुमानेन दीनानां अनुकंपया आत्मतुल्येषु मैत्र्या यमे
ननियमेन वेदांतश्रवणात् मेनामसंकीर्तनात् आर्जवेन आर्यसंगेन निरहंक्रियया एतैः उपायैः भक्तस्यशुद्धंचित्तंमांएति सर्वभूते
षुसंतंमांहित्वा यः प्रतिमां भजते सः मौढ्यात् भस्मन्येवजुहोति यावत् स्वहृदिसर्वभूतेषुस्थितंमांनवेद तावत् अर्चादौमांअर्च

येत् यदातु सर्वत्र स्थितं मां जानीयात् तदातु सर्वत्र मां अर्चयेत् तत्रापि सचेतनाचेतन वृक्षचतुष्पदादिभ्यः पूजार्थं नरः श्रेष्ठः
ततो मुक्तसंगः श्रेष्ठः तस्मात् अन्यं श्रेष्ठं न पश्यामि हे मानवि मया भक्तियोगः योगश्चते कथितः ययोः एकतरेणैव पुरुषः पुरुषं व्र
जेदिति कालरूपमाह कालस्य प्रियः द्वेष्यः कश्चित् न यद्भयात् वायुः वाति सूर्यस्तपति अग्निः ज्वलति भूर्नमज्जति एवंभूतः अनं
तः कालः सर्वेषां अंतकरः जनं जनेन जनयति मृत्युना अंतकमपि मारयति ४५ इति तृतीये एकोनविंशः २९ कपिल उवा०
तस्य अनंतस्य कालस्य उरुविक्रमं कोपि न वेद अयं दुर्मतिः जनः अध्रुवस्य देहस्य ध्रुवत्वं मन्यते गृहक्षेत्र वसूनांच स्थिरत्वं मन्य
ते अस्मिन् संसारे जंतुः यां यां योनिं व्रजेत् तस्यां तस्यां सुखं मन्यते विरक्तो न भवति नरकस्थोपि देहं त्यक्तुं नेच्छति तत्रापि स्र
त्वं मन्यते किंच आत्मजाया सुतागार पशु द्रविण बंधुषु प्रसृतमनोरथः मन्मायामोहितः जनः अहं कृतार्थोस्मीति मन्यते निरंत
रं तेषां पोषणचिंतया पातकानि कुरुते कपटधर्मेषु गृहेषु दुःखपरिणामेषु दुःखप्रतीकारं कुर्वन् सुखवत् मन्यते किंच जीविका
यां लुप्यमानायां अशक्तः सन् परार्थे स्पृहां कुरुते ततः कुटुंबपोषणासमर्थः श्रीविहीनः सन् श्वसति एवं स्वभरणाकल्पं जनं
तत्कलत्रादयः गोजरमिव नाद्रियंते तत्रापि अजातनिर्वेदः मरणाभिमुखः अवज्ञया दत्तं अन्नादि श्वानइव भुंजानः रोगी निरा
हारोल्पचेष्टितः सन् गृहे आस्ते वायुना बहिर्निर्गतनेत्रः किंच अंते कासश्वासकृतायासः कफसंरुद्धनाडिकः कंठे घुरघुरायते
कालपाशवशंगतः स्वीयैः वाच्यमानोपि उरुवेदनया न ब्रूते किंतु म्रियते सः जनः तदा यमदूतौ दृष्ट्वा शकृन्मूत्रं मुंचति तौ यातना
देहे आवृत्य गले पाशैः बध्वा दीर्घमार्गं नयतः इह राजभटाः दंड्यं यथा ततः तयोः तर्जनैः भिन्नहृदयः श्वभिर्भक्ष्यमाणः क्षुत्तृड्
व्याप्तः तप्तवालुके पथि अर्कदवानिलैः तप्तः पृष्ठे कशया ताडितः निराश्रमोदके अशक्तोपि चलति तत्र तत्र पतन् श्रांतः मूर्छितः पुनः
ओ०५ वृद्धं बलीवर्दं

उत्थितः एवं यमसदनं द्वाभ्यां त्रिंशद्भिर्वा मुहूर्तैः नवनवति सहस्रयोजनानि नीतः सन् यातनाः प्राप्नोति तत्र यमलोके स्वगात्राणां आ
दीपनं आत्ममांसादनं श्वगृध्रैः अंत्राभ्युद्धारं दशाङ्गिः सर्पवृश्चिकादिभिः पीडां तामिस्रारौरवाद्याः यातनाः नरोवानारीवामिथः
संगेन भुंक्ते हे मातः नरकः स्वर्गश्च अत्रैव तत्रत्यं क्रूरत्वदुःखादि अत्रापि दृश्यते कृतं कर्म एकैकेव भुंक्ते यावतीः यातनाः क्रमशः भुक्त्वा
पुनः नरदेहं प्राप्नोति ३४ इति तृतीये त्रिंशः ३० श्रीभगवानुवा॰ जंतुः दैवनेत्रेण कर्मणाः पुंसः रेतः कणाश्रयः स्त्रियः उदरं
प्रविष्टः एकरात्रेण कललं भवति पंचरात्रेण बुद्बुदं दशाहेन कर्कंधूफलम् ततः पेशी अंडं वा मासेन शिरः द्वाभ्यां बाह्वंघ्र्यादि त्रि
भिः नखरोमास्थिचर्माणि चतुर्भिः धातवः पंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणावीतः दक्षिणे कुक्षौ भ्राम्यति मातुः जग्धान्न
पानाद्यैः एधद्धातुः विण्मूत्रगर्ते शेते तत्र कृमिभिः क्षतसर्वांगः पंजरे शकुंत इव यातनाः भुंक्ते सप्तममासादारभ्य तत्र दैवात्
लब्धस्मृतिः सूतिवातैः भ्रमन् कृतांजलिः सन् येन उदरे अर्पितः तं वाचास्तौति जीवउवाच येन ईदृशी गतिः दर्शिता तं
अहं शरणं व्रजामि अहं प्रकृतिपुरुषयोः परं प्रभुं मांसं वंदे अहं बहुदुःखरूपगर्भवासात् न निर्जिगमिषे अत्रैव सर्वकर्मफलं भु
क्त्वा उपसादितविष्णुपादः आत्मानं उद्धरिष्ये कपिलउवाच गर्भे एवं कृतमतिं प्रसूतिमारुतः अवाचीनं क्षिपति तेन आ
तुरः हृतस्मृतिः विनिष्क्रामति भुवि पतितः ज्ञाने गते सति रोरूयति तदा स्वेदजदूषिते अशुचिपर्यंके शायितः दुःखं भुंक्ते इ
त्यादि शैशवं पौगंडं च भुक्त्वा तारुण्ये सति शिश्नोदरकृतोद्यमः असत्पथि आस्थितः रमन् पूर्ववत् तमः विशति एवं असत्सं
गात् सत्यादिनियमाः क्षयं यांति तथा योषित्संगात्पुंसो बंधो भवति तथा अन्यसंगतः न अहो ब्रह्मापि स्वां दुहितरं दृष्ट्वा मोहितः १३
किंच मे मायाबलं पश्य या स्त्रीरूपिणी मे माया दिशां जयिनोपि पदाक्रांतान् करोति अतः योगं आचरन् प्रमदासु संगं न कुर्यात् य

स्मात् ज्ञानवैराग्ययुक्तया विचारबुद्ध्यामायाविरचितेलोकेदेहासक्तिंत्यक्त्वाविचरेत् ४७ इतितृतीयेएकत्रिंशः ३१
कपिलउवाच अथगृहेधर्मानेव आचरन् यःवर्तते सः पुनः धर्मकामान्दोग्धि किंच भगवद्धर्मान्त्यक्त्वाक्रतुभिःदेवान्पि
तॄन् यजन् चांद्रमसंलोकंगत्वापुनः अत्रएष्यति येनिवृत्तिधर्मनिरताः निष्कामकर्माणः शुद्धचेतसः निरहंकाराः संतः तेसूर्यद्वारेण
विश्वतोमुखंपुरुषंयांति तेब्रह्मलोकंस्थित्वा अंतेब्रह्मणासहमुच्यंते हेभामिनिसर्वभूतानांहृत्पद्मस्थितंपरमात्मानंभक्त्या
शरणंव्रज भगवतिवासुदेवेप्रयोजितः भक्तियोगः वैराग्यंब्रह्मदर्शनंज्ञानंचजनयति योगिनःसर्वत्रअसंगः इतियत् अयमेव
अभिमतोर्थः युज्यंते येअच्युतकथासुधांहित्वा असद्गाथाःशृण्वंति तेविड्भुजः पुरीषमिव नूनंदैवेननिहताःस्युः एवंब्रह्मरू
पंसमाहितात्मानिःसंगःनित्यशः श्रद्धया भक्त्यायोगाभ्यासेनविरक्त्याच परिपश्यति हेगुर्विइत्येतत्ब्रह्मदर्शनंज्ञानंतेकथितं
भक्तियोगस्यस्वरूपंकालस्यगतिंजीवस्यबह्वीः संसृतीः तत्वसंख्यानं वैराग्यंज्ञानंच प्रावोचम् इदंखलाय अविनीतायस्तब्धा
यदांभिकायलोभिने अभक्ताय मद्भक्तद्विषांचनोपदिशेत् श्रद्दधानायभक्तायनम्रायभूतेषुकृतमैत्राय मत्सेवारतायविरक्ता
यशांतचित्तायशुचये यस्याहंप्रियः तस्मैइदंउपदिशेत् हेअंबयः पुरुषःश्रद्धयाइदंशृणुयात् योवाअभिधत्ते सःमत्पदवींएति
४३ इतितृतीयेद्वात्रिंशः ३२ मैत्रेयउवाच एवंकपिलस्यजनित्रीकर्दमस्यपत्नीदेवहूतिः गतमोहासतीसांख्यप्रवर्त
कंतंप्रणम्यतुष्टाव हेभगवन् यस्यउदरेएतद्विश्वमासीत् यःत्वंयुगांतेमायाशिशुः अंघ्रिपानःएकःवटपत्रेशेतेस्मसः अजःत्वंम
याजठरेणकथंनुधृतः त्वंपाप्मनांप्रशमायनिदेशभाजांविभूतयेदेहंतत्रोभवसि यथातवसूकरादयः अवताराः तथाआत्मप-
थोपलब्धये अयमपि हेप्रभ्वस्मात् यन्नामधेयश्रवणकीर्तनादिभिः श्वादोऽपिसद्यः यज्ञार्थयोग्योभवति अतःअहंकृतार्थास्मि

किंच तवनामयस्यजिह्वाग्रेवर्ततेते सः श्वपचोगरीयान् ये आर्याः तेनामउच्चरंति ते एवतपोहोमतीर्थस्नानवेदाध्ययनादिकंकृ
तवंतः अहंब्रह्मरूपंवेदगर्भंविष्णुंकपिलंत्वांवंदे कपिलउवाच हेमातः अनेनमार्गेणजीवन्मुक्तिंशीघ्रंत्वंप्राप्स्यसि
मैत्रेयउवाच भगवान्तांआत्मनोगतिंप्रदर्श्य ब्रह्मवादिन्यातया अनुज्ञातः ययौ सातेनमार्गेणतस्मिन् आश्रमेउग्रतपसा
कृशंआत्मानंबिभ्रतीतांविमानसंपत्तिंइंद्रयोषितामपि ईप्सितांहित्वातमेवकपिलंहरिंध्यायतीतादृशेगृहेनिस्पृहाबभूव भ
क्तिप्रवाहयोगेन बलीयसावैराग्येणयुक्तानुष्ठानजातेन ब्रह्महेतुनाज्ञानेनआत्मनाब्रह्मण्यवस्थितमतिः निवृत्तगुणभ्रमा
स्वदेहंनसस्मार तस्याः देहः परतः पोष्यः मलैः अवच्छन्नोपिसधूमपावकइवबभौ वासुदेवप्रविष्टधीः सतीमुक्तकेशंगतांब
रंस्वांगंनसस्मार एवंकपिलोक्तेनमार्गेणसाब्रह्मनिर्वाणंआप हेविदुरयत्रसासिद्धिंप्राप्ता तत्क्षेत्रंनाम्नासिद्धपदंआसीत्
तस्याः शरीरंसिद्धिदानामनदीआसीत् कपिलोपिमातरंसमनुज्ञाप्यपितुः आश्रमात् देवादिभिः स्तुतः प्रागुदीचींदिशंययौ
समुद्रेणदत्तार्हणनिकेतनः त्रयाणांलोकानांशांत्यैयोगंआस्थाय आस्ते हेविदुरकपिलस्यदेवहूत्याश्चसंवादः तेकथितः यः क
पिलमतंशृणोति श्रावयेद्वासः भगवनिकृतधीः भगवत्पदारविंदंउपलभते ३७ इतिश्रीभागवतेतृतीयस्कंधचूर्णिका-
यांत्रयस्त्रिंशोऽध्यायः ३३ ॥ श्रीकृष्णार्पणमस्तु ॥ अयंस्कंधः संपूर्णः ॥ ॥